# सोमतिलकसूरिविरचितं करहेटकपार्श्वनाथस्तोत्रम्

-सं. विजयमुनिचन्द्रसूरि

तपागच्छीय आचार्यश्रीसोमतिलकसूरिजीए रचेल आ स्तोत्र एक प्राचीन फुटकर पानां धरावती प्रतिमांथी प्राप्त थयुं छे. प्रतिनी लखावट जोतां ते संभवतः १६मा शतकनुं होवानुं लागे छे. आ स्तोत्र अप्रगट होवाथी अत्रे प्रकाशनार्थे प्रस्तुत छे.

स्वामिन् ! नमन्नर-सुरा-ऽसुरमौलिमौलि-
रत्नप्रभापटलपाटलितांऽह्रिपद्म ! ।
**पार्श्वप्रभो** ! भुवनभासनभास्कर ! त्वा-
मानौम्यमानबहुमानमहं महेश ! ॥१॥

श्री**अश्वसेन**नरनाथकुलावतंस !
**वामा**वरोदरसरोवरराजहंस ! ।
भव्याऽङ्गिमानसमहार्णवपूर्णचन्द्र !
कस्त्वां न नौति जिननायक ! वीततन्द्रः ॥२॥

विश्वत्रयार्तिहरणप्रवणप्रवीण !
विश्वत्रयीमथनमन्मथभावहीन ! ।
विश्वत्रयीसकलमङ्गलदानदक्ष !
विश्वत्रयोद्धरणधीरसरोरुहाक्ष ! ॥३॥

संसारवारिनिधितारणयानपात्र !
त्रायस्व विश्वमखिलं गुणरत्नपात्र !
कीर्तिप्रतापपरितर्जितपुष्पदन्त !
**पार्श्वप्रभो** ! भुवनभूषणपुष्पदन्त ! ॥४॥

देव ! त्वदङ्गमहसा सहसा जितेव ,
सूर्याङ्गजा जलभरं वहते हतेर्ष्या ।
त्रैलोक्यलोकमहितस्य हितस्य सर्व-
सत्त्वेषु ते कथय को न हि किङ्करोऽस्ति ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानानलेन भवता भुवनाधिनाथ !
कर्मेन्धनं निधनमाप्यत **पार्श्वनाथ** !
त्वन्मूर्ध्नि नागपतिसप्तफणामिषेण
तेनेव धूमलहरी लसति प्रकामम् ॥६॥

स्वामिन्नशोकतरुरेष जनानशोकान्
धर्मं दिशन्निव स्वैरलिनां करोति ॥
प्राज्यप्रभावभवनस्य भवादृशस्य ,
सङ्गान्न के विमतयोऽपि भवन्ति तज्ज्ञाः ? ॥७॥

मन्ये पुरस्तव विकस्वरपञ्चवर्ण-
जानुप्रमाणकुसुमप्रकरच्छलेन ।
विश्वाधिपस्य भवतो भयतः स्मरेणा-
ऽऽमुच्यन्त पञ्चविशिखान् सविषादमीश ! ॥८॥

दोषाकलङ्कजडताश्रयिणः सुधांशोः ,
साम्यं कथं भवतु ते वदनस्य देव ! ।
नित्यं श्रियः कुलगृहस्य हि यस्य गाव-
स्तापं जनस्य शमयन्ति सुधायमानाः ॥९॥

त्रैलोक्यलोचन ! सुधाञ्जनचारुरूपं ,
चन्द्रांशुचारुचमरावलीरुत्तरन्ती ।
मौलेर्गिरेरिव नदी जलपूरपूर्णा ,
पार्श्वद्वयेऽपि तव देव ! विभाति शुभ्रा ॥१०॥

भित्त्वा विभो ! नर-सुरा-ऽसुरसंसदोऽसौ ,
सिंहः सुवर्णमणिनिर्मितमासनं ते ।
संश्रित्य विज्ञपयतीव यथा भवाब्धे-
र्मां नाथ ! तारय पशुं पशुजात्युपेतम् ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भावयामि भवतस्तनुसम्भवेन ,
भामण्डलेन सितिना जिन ! भासुरेण ।
पूर्णं नभस्तलमिदं सकलं यदीति ,
नो तत्कथं मरकताभमिदं बभूव ॥१२॥

व्योमस्थितस्त्रिदशदुन्दुभिरेष हृद्यः ,
पुंसां नदन्निति विभो वदतीव नित्यम् ।
भो भो ! जगत्त्रयपतिर्जगदर्थवेदी ,
नाऽतः परोऽस्ति भुवने तदमुं श्रयध्वम् ॥१३॥

लोकत्रयैकतिलकं प्रणमन्त्यमुं ये ,
ते कीर्तिकेवलशिवत्रयमाश्रयन्ते ।
कुन्देन्दुसुन्दरतरं त्रिजगज्जनानां ,
छत्रत्रयं तव निवेदयतीव देव ! ॥१४॥

कुन्दावदातयशसं भगवन् ! भवन्तं ,
भिन्नेन्द्रनीलमणिनिर्मलकायकान्तिम् ।
कारुण्यपुण्यहृदयं हृदि यो बिभर्त्ति ,
यान्ति क्षणेन विपदः क्षयमीश ! तस्य ॥१५॥

इति श्रीमत्**पार्श्व**क्षितिवलयविख्यात**करहे**- ,
**टक**स्याऽलङ्कार ! त्रिभुवनपते ! नम्रशिरसाम् ।
सभावं स्तोतॄणां विदलय महामोहपटलं ,
घनं कर्मव्रातं हर वितर निर्वाणपदवीम् ॥१६॥

**पूज्यभट्टारकप्रभुश्रीसोमतिलकसूरिविरचितं**
**करहेटकमण्डनश्रीपार्श्वनाथस्तोत्रम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org